**Series &RQPS/S**

**Set-4**

प्रश्न-पत्र कोड
Q.P. Code **22/S**

रोल नं.
Roll No. | | | | | | | | |

परीक्षार्थी प्रश्न-पत्र कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Q.P. Code on the title page of the answer-book.

# संस्कृतम् (केन्द्रिकम्)
# SANSKRIT (Core)

*समयोः : होरात्रयम्* | *पूर्णाङ्काः : **80***
*निर्धारित समय : **3** घण्टे* | *अधिकतम अंक : **80***
*Time allowed : **3** hours* | *Maximum Marks : **80***

| | नोट | | NOTE |
|---|---|---|---|
| (I) | कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **19** हैं । | (I) | Please check that this question paper contains **19** printed pages. |
| (II) | कृपया जाँच कर लें कि इस प्रश्न-पत्र में **18** प्रश्न हैं । | (II) | Please check that this question paper contains **18** questions. |
| (III) | प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए प्रश्न-पत्र कोड को परीक्षार्थी उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें । | (III) | Q.P. Code given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate. |
| (IV) | **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में प्रश्न का क्रमांक अवश्य लिखें ।** | (IV) | **Please write down the serial number of the question in the answer-book before attempting it.** |
| (V) | इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे । | (V) | 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period. |

***General Instructions :***

*Question paper is divided into **4** sections.*

*It has total **18** questions.*

***Section A** – 1 Question no. 1 to 1*

***Section B** – 3 Questions no. 2 to 4*

***Section C** – 4 Questions no. 5 to 8*

***Section D** – 10 Questions no. 9 to 18*

*Attempt questions as per specific instructions.*

*Write question no. in answer book before attempting it.*

***सामान्य निर्देशाः***

*अस्मिन् प्रश्नपत्रे **चत्वारः** खण्डाः सन्ति ।*

*अस्मिन् प्रश्नपत्रे अष्टादश **(18)** प्रश्नाः सन्ति ।*

***खण्डः 'क'** – 1 – प्रश्नसंख्या 1*

***खण्डः 'ख'** – 3 – प्रश्नसंख्या 2 – 4*

***खण्डः 'ग'** – 4 – प्रश्नसंख्या 5 – 8*

***खण्डः 'घ'** – 10 – प्रश्नसंख्या 9 – 18*

*विशिष्ट-निर्देशानुसारं प्रश्नाः समाधेयाः ।*

*उत्तरपुस्तिकायां लेखनात् पूर्वं सर्वप्रथमं प्रश्नसंख्या लेखनीया ।*

## खण्ड: 'क'

## अपठित-अवबोधनम्

*10 अङ्काः*

## अपठित अवबोधन

## Unseen Reading Comprehension

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।
निम्नलिखित गद्यांश को पढ़कर दिये गए प्रश्नों के उत्तर संस्कृत में लिखिए।
Read the following passage and answer the given questions in Sanskrit.

सेवाधर्म: परमधर्म: । सेवाया: अयमेव अभिप्राय: यत् मानव: सम्यक् परस्परं साहाय्यं कुर्यात् । सर्वो हि विविधरूपेण सक्षम: । स्वक्षमतया परेभ्य: सहयोगप्रदानं हि जीवनस्य सार्थक्यम् उद्देश्यं भवति । सेवा द्विविधा भवति – पारमार्थिकी लौकिकी च । पारमार्थिकसेवया महात्मान: जनेभ्य: ज्ञानं यच्छन्ति । ते हि तेषां दोषनिवारणार्थं पारस्परिकं वैमनस्यं च दूरीकर्तुं प्रयतन्ते । सांसारिक-सम्बन्धेषु मानवताया: भावनाया: विकासाय लौकिकसेवाया अपि महत्त्वम् वर्तते । कस्यचिद् असहायस्य सेवा लौकिकी-सेवा भवति । अनया समाजे शोभना: सम्बन्धा: जायन्ते । जनानां पारस्परिक-समस्यानां समाधानमपि भवति । जना: सदैव एतदेव चिन्तयन्तु यद् यावद् वयं स्वस्था: सक्षमा: तावद् अस्माकं परेषां सर्वथा हितचिन्तनमेव सेवाधर्मो भवेत्। 'सर्वे भवन्तु सुखिन:' इत्येव भावनया वयं सततं जागरूका: भवेम।

**प्रश्ना:**

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in one word : (Only two questions) *2×1=2*

(i) अस्माकं परमधर्म: क: ?

(ii) महात्मान: जनेभ्य: किं यच्छन्ति ?

(iii) कस्य सेवा लौकिकी-सेवा भवति ?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in a complete sentence : (Only two questions) *2×2=4*

(i) जीवनस्य सार्थक्यम् उद्देश्यं किं भवति ?

(ii) सेवाया: अभिप्राय: क: ?

(iii) वयं सततं कथं जागरूका: भवेम ?

(इ) अस्य गद्यांशस्य उचितं शीर्षकं संस्कृतेन लिखत।

इस गद्यांश का उचित शीर्षक संस्कृत में लिखिए।

Write a suitable title for this passage in Sanskrit. *1×1=1*

(ई) यथानिर्देशम् उत्तरत : (केवलं प्रश्नत्रयम्)

निर्देशानुसार उत्तर दीजिए : (केवल तीन प्रश्न)

Answer as directed : (Only three questions) *3×1=3*

(i) 'अक्षम:' इति पदस्य विपर्ययपदं चिनुत :

(A) सक्षम:

(B) अभिप्राय:

(C) मानव:

(D) शोभन:

(ii) 'पारस्परिकम्' इति विशेषणस्य विशेष्यपदं चिनुत :

(A) परेषाम्

(B) वैमनस्यम्

(C) ज्ञानम्

(D) समाधानम्

(iii) 'चिन्तयन्तु' इति क्रियापदस्य कर्तृपदं चिनुत :

(A) परेभ्य:

(B) मानव:

(C) जना:

(D) सक्षमा:

(iv) 'सावधाना:' इति पदस्य समानार्थकपदं चिनुत :

(A) सर्वथा

(B) सततम्

(C) सक्षमा:

(D) जागरूका:

**खण्डः 'ख'**

**रचनात्मक-कार्यम्** *15 अङ्काः*

**रचनात्मक कार्य**

**Writing Skills**

**2.** भवान् गोपालः । भवतां विद्यालये आयोज्यमाने वार्षिकोत्सवे संस्कृतनाटकस्य मञ्चनं भविष्यति । अस्मिन्नवसरे स्वमित्राय प्रेषिते निमन्त्रणपत्रे मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयतु ।
आप गोपाल हैं । आपके विद्यालय में आयोजित किए जाने वाले वार्षिकोत्सव में संस्कृत नाटक का मञ्चन होना है । इस अवसर पर मित्र को लिखे गए निमन्त्रण-पत्र में मञ्जूषा में दिए गए शब्दों से रिक्त स्थानों की पूर्ति करके पुनः लिखिए ।
You are Gopal. On the annual day of your school a performance of a Sanskrit Drama is to take place. In an invitation letter written to your friend fill in the blanks with words given in the box and rewrite the same. $10\times\frac{1}{2}=5$

**पत्रम्**

नवदिल्लीतः

प्रिय मित्र सन्दीप ! दिनाङ्क ________

सप्रेम (i) ________

अत्र कुशलं तत्रास्तु । अस्माकं (ii) _________ वार्षिकोत्सवः 'वसन्त-पञ्चमी' इति पर्वणः अवसरे आयोक्ष्यते । अत्र महाकवि-कालिदासेन (iii) ___________ अभिज्ञानशाकुन्तलस्य चतुर्थाङ्कस्य (iv) _________ छात्रैः प्रस्तोष्यते । अयम् (v) ___________ अभिज्ञानशाकुन्तलनाटकस्य रत्नभूतः अस्ति । अहमपि कण्वस्य (vi) __________ निर्वहामि । अस्माभिः प्रतिदिनं नाटकस्य (vii) __________ क्रियते । एतद् दृष्ट्वा त्वम् नूनम् (viii) __________ अनुभविष्यसि । अस्मिन् दिने त्वया अवश्यमेव अत्र (ix) ___________ । परिवारे सर्वेभ्यः मम (x) __________ निवेदनीयाः ।

तव अभिन्नमित्रम्

गोपालः

**मञ्जूषा**

| |
|---|
| आनन्दम्, नमोनमः, विद्यालयस्य, आगन्तव्यम्, पूर्वाभ्यासः, विरचितस्य, प्रणामाञ्जलयः, मञ्चनम्, अङ्कः, भूमिकाम् । |

**3.** (क) मञ्जूषा-प्रदत्तशब्दानां सहायतया अधोलिखितायां लघुकथायां रिक्तस्थानानि पूरयित्वा कथां पुन: लिखत।

मञ्जूषा में दिए गए शब्दों की सहायता से नीचे लिखी लघुकथा में रिक्त स्थान भरकर कथा को पुन: लिखिए।

Complete the blanks of the following short story, with the help of the words given in the box below and rewrite the same. $10 \times \frac{1}{2} = 5$

नागार्जुन: प्रसिद्ध: रसायनशास्त्रज्ञ: सुविख्यात: (i) ___________ आसीत्। देशविदेशेषु तस्य (ii) ___________ प्रसृता। एकदा तस्य समीपे द्वौ (iii) ___________ आगच्छताम्। तौ तस्य सहायकौ भवितुम् इच्छत: स्म। नागार्जुन: उभाभ्याम् अपि एकम् एकं वस्तु (iv) ___________ उक्तवान् – श्व: अनेन रसायनं निर्माय (v) _________। तेनैव भवतो: परीक्षा भविष्यति, एकस्य चयनमपि (vi) _________। अन्यस्मिन् दिने एक: रसायनं (vii) __________ आनीतवान्। द्वितीय: अवदत् – कृपया क्षम्यताम्। मया मार्गे एक: वृद्ध: रोगी (viii) __________। तं चिकित्सालयं नीत्वा सेवां कृतवान्। अत: (ix) _________ समय: एव न लब्ध:। स: रुग्ण: नागार्जुनेन एव मार्गे (x) __________ स्थापित: आसीत्, अत: द्वितीय: एव युवक: परीक्षायां सफल: जात:।

**मञ्जूषा**

| |
|---|
| निर्माय, वैद्य:, रसायननिर्माणार्थं, आनेतव्यम्, दत्त्वा, कीर्ति:, करिष्यामि, दृष्ट:, युवकौ, परीक्षायै। |

**अथवा (OR)**

(ख) अधोलिखित-संवादे रिक्तस्थानानि पूरयत :

निम्नलिखित संवाद में रिक्त स्थान भरिए :

Fill in the blanks in the following conversation : $5 \times 1 = 5$

*विजय:* — भो अजय ! किं त्वं जानासि यत् गान्धिमहोदयस्य जन्मदिवस: कदा भवति ?

*अजय:* — मित्र विजय ! (i) ____________________।

*विजय:* — अक्टूबरमासस्य द्वितीये दिवसे तु अन्यमहोदयस्यापि जन्मदिवसो भवति। किं जानासि तस्य नाम ?

*अजय:* — मित्र ! (ii) ____________________।

| | | |
|---|---|---|
| *विजय:* | — | शोभनम् । एष: तु अस्माकं पूर्वप्रधानमन्त्री श्रीलालबहादुर: शास्त्री अतीव सौम्य:, सरल: देशभक्तश्च आसीत् । तेन का उद्घोषणा कृता आसीत् ? |
| *अजय:* | — | (iii) ____________________ । |
| *विजय:* | — | सत्यमुक्तम् । अस्माकं पूर्वप्रधानमन्त्री श्री अटलबिहारी वाजपेयी एकम् अन्यमपि उद्घोषं कृतवान् – 'जय जवान, जय किसान, जय विज्ञान' इति । अस्मिन् दिने कीदृशानां वस्त्राणां मूल्यं न्यूनं जायते ? |
| *अजय:* | — | (iv) ____________________ । |
| *विजय:* | — | मित्र ! वस्तुत: 'खादी' तु अस्माकं कुटीर-उद्योगो वर्तते । खादीवस्त्राणां निर्माणे प्रमुखं किं साधनम् आसीत् ? |
| *अजय:* | — | (v) ____________________ । |
| *विजय:* | — | सत्यमुक्तम् । स्वतन्त्रतान्दोलने 'चरखान्दोलनम्' इत्यपि प्रसिद्धमासीत् । अत: सर्वैरपि खादीवस्त्राणां प्रयोग: अवश्यमेव करणीय: । |

**4.** अधोलिखितवाक्येषु केषाञ्चन **पञ्च**वाक्यानां संस्कृतेन अनुवादं कुरुत ।

निम्नलिखित वाक्यों में से किन्हीं **पाँच** वाक्यों का संस्कृत में अनुवाद कीजिए ।

Translate any **five** sentences in Sanskrit from the following sentences. *5×1=5*

(i) महाभारत वेद व्यास की रचना है ।
Mahabharat is the creation of Ved Vyas.

(ii) सुजाता संस्कृत-निबन्ध लिखती है ।
Sujata writes Sanskrit essay.

(iii) प्राणियों पर दया करो ।
Have pity on the animals.

(iv) छात्र कल चिड़ियाघर जाएँगे ।
The students will go to zoo tomorrow.

(v) मोनिका गुरु को प्रणाम करती है ।
Monika bows down to the teacher.

(vi) बच्चों ! शोर मत करो ।
Don't make noise, kids.

(vii) गाँव में किसान रहते हैं ।
Farmers live in the village.

## खण्ड: 'ग'

## अनुप्रयुक्त-व्याकरणम्

## अनुप्रयुक्त-व्याकरण

## Applied Grammar

*20 अङ्का:*

5. अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिच्छेदं सन्धिं वा कुरुत। (प्रश्नषट्कं केवलम्)
निम्नलिखित वाक्यों में रेखांकित पदों का सन्धि-विच्छेद अथवा सन्धि कीजिए। (केवल छ: प्रश्न)
Disjoin or join sandhis in the underlined words of the following sentences. (Only six questions) : *6×1=6*

(i) धर्मात् + न प्रमदितव्यम्।

(ii) तेन हि उदर्केण गुणेनात्र भवितव्यम्।

(iii) तत: पुनर्निपुणं निरीक्ष्यमाण:।

(iv) स्वशिशूनां चरित्रनिर्माणं मातु: + आधीनम्।

(v) सन्यासिन्! सन्ध्योपासनसमये भवादृशानां प्रवेशसमयो भवति।

(vi) तस्य एव वचनात् भवदभिषेको निवृत्त:।

(vii) लक्ष्मीस्तु तव दासी भविष्यति न + एव सपत्नी।

6. अधोलिखितवाक्येषु रेखाङ्कितपदानाम् उचितं समस्तपदं विग्रहं वाक्यं वा प्रदत्तविकल्पेभ्य: चिनुत। (केवलं प्रश्नपञ्चकम्)
निम्नलिखित वाक्यों में रेखांकित पदों का उचित समस्तपद या उचित विग्रह वाक्य को प्रदत्त विकल्पों से चुनिए। (केवल पाँच प्रश्न)
Select the appropriate expound from the given choices for the underlined words 'समस्तपदं' or 'विग्रहवाक्य' of the following sentences. (Only five questions) *5×1=5*

(i) यान्यस्माकं <u>शोभनानि चरितानि</u> तानि त्वयोपास्यानि।

(A) शोभनचरितानि

(B) सुशोभचरितानि

(C) सुचरितानि

(D) स्वचरितानि

(ii) <u>महाराज</u>: इति आर्य ननु वक्तव्यम्।

(A) महा राजा इति

(B) महान् चासौ राजा

(C) महत् राजा

(D) महान् राज:

(iii) कोऽपि <u>घृतम् तुम्बीपात्रम्</u> येन स: सन्यासी दृष्ट:।

(A) घृतम् तुम्बीपात्रम्

(B) घृततुम्बीपात्र:

(C) घृततुम्बीपात्रम्

(D) घृततुम्बीपात्राणि

(iv) त्वया <u>यथोचितं</u> व्यवहरिष्यति।

(A) यथा उचितम्

(B) उचितम् अनतिक्रम्य

(C) उचितं यथा

(D) यथा अनतिक्रम्य

(v) परस्परम् अनुव्रतौ पति पत्न्यौ त्रिवर्गं साधयत: ।

(A) पति: च पत्नी च

(B) पति: च पत्न्यौ च

(C) पती च पत्नी: च

(D) पति: च पत्न्य: च

(vi) यदि राजलक्ष्मी: भोजकुमारं गमिष्यति ।

(A) राजाय लक्ष्मी:

(B) राजाया: लक्ष्मी:

(C) राज्ञ: लक्ष्मी:

(D) राजस्य लक्ष्मी:

**7.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृति-प्रत्यययोगं प्रदत्त-विकल्पेभ्य: चिनुत । (केवलं प्रश्नषट्कम्)

निम्नलिखित वाक्यों में रेखांकित पदों के उपयुक्त संयुक्त अथवा विभक्त प्रकृति-प्रत्यय योग को दिए गए विकल्पों में से चुनिए। (केवल छ: प्रश्न)

From the given choices, choose the correct combination of joint or disjoint set of suffix for the underlined words in the following sentences. (Only six questions) *6×1=6*

(i) धर्मान्न प्रमदितव्यम् ।

(A) प्र + मद् + क्तवतु

(B) प्र + मद् + तव्यत्

(C) प्र + मद् + क्त

(D) प्र + मद् + शानच्

(ii) असौ मया हन् + क्त शत्रु: ।

(A) हतवान्

(B) हनित:

(C) हन्त:

(D) हत:

(iii) गृहस्थप्रयोगशालायां स्वपत्न्यै स्वतन्त्रतां दद्यात् ।

(A) स्वतन्त्र + तल्

(B) स्वतन्त्र + क्त

(C) स्वतन्त्र + क्तवतु

(D) स्वतन्त्र + टाप्

(iv) भोजश्चापि चिरं प्रजा: पालितवान् ।

(A) पाल् + तव्यत्

(B) पाल् + क्तवतु

(C) पाल् + क्त

(D) पाल् + वतुप्

(v) अपेक्षया रूपवतां हि विद्या ।

(A) रूप + मतुप्

(B) रूप + क्तवतु

(C) रूप + क्त

(D) रूप + शतृ

(vi) दौवारिकस्तु तमाकृष्य नयन् एव प्रचलित: ।

(A) नी + अन्

(B) नी + शानच्

(C) नी + शतृ

(D) नी + क्त

(vii) माता एव प्रथमा ________ आचार्य + टाप् ।

(A) आचार्या

(B) आचार्य:

(C) आचार्यवान्

(D) आचरणीया

**8.** समुचितम् उपपद-विभक्तिरूपं चिनुत। (केवलं प्रश्नत्रयम्)

उपयुक्त उपपद विभक्ति के रूप को चुनिए। (केवल तीन प्रश्न)

Choose the appropriate subordinate clause form. (Only three questions) *3×1=3*

(i) ________ सदृशागम:।

(A) प्रज्ञा

(B) प्रज्ञया

(C) प्रज्ञाम्

(D) प्रज्ञाया:

(ii) निरीक्षते ________ प्रविश्य क्रमेलक:।

(A) केलिवने

(B) केलिवनस्य

(C) केलिवनम्

(D) केलिवनात्

(iii) कश्चन कापालिक: ________ समागत:।

(A) सभाम्

(B) सभायाम्

(C) सभया

(D) सभायै

(iv) गुरुवर्यै: ________ अधिकृत्य कथितम्।

(A) अहम्

(B) मया

(C) माम्

(D) मह्यम्

## खण्ड: 'घ'

## (i) पठितावबोधनम् — *25 अङ्का:*

## पठित-अवबोधन

## Reading Comprehension

**9.** अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत।
निम्नलिखित गद्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए।
Read the following prose passage and answer the questions based on them in Sanskrit. *5*

वत्सराजस्य इदं वचनमाकर्ण्य कुपितो राजा प्राह – त्वं मम सेवकोऽसि, मया यत्कथ्यते त्वया तद् विधेयम् । पुन: वत्सराज: राजाज्ञा पालनीया एवेति मत्वा तूष्णीं वभूव । अनन्तरम् अनिच्छन्नपि वत्सराज: भोजं रथे निवेश्य रात्रौ वनं नीतवान् । तत्र आत्मनो वधयोजनां ज्ञात्वा भोज: किमपि वत्सराजं कथितवान् । तद्वचनै: वैराग्यमापन्नो वत्सराज: तं न हतवान्, अपितु गृहमागत्य भोजं गृहाभ्यन्तरे भूमौ निक्षिप्य ररक्ष । पुन: कृत्रिमरूपेण भोजस्य मस्तकं कारयित्वा राजभवनं गत्वा वत्सराजो राजानं प्राह – श्रीमता यथादिष्टं तत्साधितमस्ति । ततो राजा भोजवधं ज्ञात्वा तं पृष्टवान् वत्सराज ! खड्गप्रहारसमये तेन किमुक्तम् ?

**प्रश्ना:**

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in one word : (Only two questions) *$2\times\frac{1}{2}=1$*

(i) कस्य वचनमाकर्ण्य कुपितो राजा प्राह ?

(ii) भोजं रथे निवेश्य कस्मिन् समये वनं नीतवान् ?

(iii) कस्य कृत्रिमरूपेण मस्तकं कारयित्वा वत्सराज: राजभवनं गत: ?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in a complete sentence : (Only two questions) *$2\times1=2$*

(i) कुपितो राजा वत्सराजं किं प्राह ?

(ii) राज्ञ: वचनै: वैराग्यमापन्नो वत्सराज: किं कृतवान् ?

(iii) राजा भोजवधं ज्ञात्वा वत्सराजं किं पृष्टवान् ?

(इ) यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्)
निर्देशानुसार उत्तर दीजिए : (केवल दो प्रश्न)
Answer as directed : (Only two questions) *$2\times1=2$*

(i) 'वैराग्यमापन्न:' इति विशेषणस्य विशेष्यपदं किम् ?

(ii) 'प्रसन्न:' इति पदस्य विलोमपदं किं प्रयुक्तम् ?

(iii) 'भोज:' इति कर्तृपदस्य क्रियापदं किम् ?

**10.** अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत।

निम्नलिखित पद्य को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए।

Read the following poetry and answer the questions based on them in Sanskrit. *5*

अल्पज्ञ एव पुरुषः प्रलपत्यजस्रं,
पाण्डित्यसम्भृतमतिस्तु मितप्रभाषी।
कांस्यं यथा हि कुरुतेऽतितरां निनादं,
तद्वत् सुवर्णमिह नैव करोति नादम्॥

**प्रश्नाः**

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in one word : (Only two questions) $2\times\frac{1}{2}=1$

(i) कीदृशः एव पुरुषः अजस्रं प्रलपति ?

(ii) अतितरां निनादं किम् करोति ?

(iii) मितप्रभाषी कः भवति ?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in a complete sentence : (Only two questions) $2\times1=2$

(i) कीदृशः पुरुषः मितं प्रभाषते ?

(ii) सुवर्णं किं न करोति ?

(iii) कांस्यं किं कुरुते ?

(इ) यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्)
निर्देशानुसार उत्तर दीजिए : (केवल दो प्रश्न)
Answer as directed : (Only two questions) $2\times1=2$

(i) 'बहुप्रभाषी' इति पदस्य विपर्ययपदं चिनुत।

(ii) 'पुरुषः' इति पदस्य विशेषणपदं किमस्ति ?

(iii) 'सुवर्णम्' इति कर्तृपदस्य क्रियापदं किम् ?

**11.** अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत।

निम्नलिखित नाट्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए।

Read the following part of a drama and answer the questions based on it in Sanskrit. *5*

*संन्यासी* — तत् किं कोऽपि न प्रविशति रात्रौ ?

*दौवारिक:* — (साक्षेपम्) कोऽपि कथं न प्रविशति ? परिचिता वा, प्राप्तपरिचयपत्रा वा, आहूता वा प्रविशन्ति, न तु ये केऽपि समागता भवादृशा:।

*संन्यासी* — दौवारिक ! इत आयाहि किमपि कर्णे कथयिष्यामि।

*दौवारिक:* — (तथा कृत्वा) कथ्यताम्।

*संन्यासी* — यदि त्वं मां प्रविशन्तं न प्रतिरुन्धे: तदधुनैव परिष्कृत-पारदभस्म तुभ्यं दद्याम् यथा त्वं गुञ्जामात्रेणापि द्वा पञ्चाशत्-संख्याक-तुलापरिमितं ताम्रं सुवर्णं विधातुं शक्नुया:।

*दौवारिक:* — हंहो, कपटसंन्यासिन् ! कथं विश्वासघातं स्वामिवञ्चनं च शिक्षयसि ? ते केचनान्ये भवन्ति नीचा ये उत्कोचलोभेन स्वामिनं वञ्चयित्वा आत्मानम् अन्धतमसि पातयन्ति, न वयं शिवगणास्तादृशा:। (संन्यासिनो हस्तं धृत्वा) इतस्तु सत्यं कथय कस्त्वम् ? कुत आयात: ? केन वा प्रेषित: ? अहं तु त्वां कस्यापि देशद्रोहिणो गूढचरं मन्ये। (हस्तमाकृष्य) तदागच्छ दुर्गाध्यक्षसमीपे, स एवाभिज्ञाय त्वया यथोचितं व्यवहरिष्यति।

**प्रश्ना:**

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)

एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)

Answer in one word : (Only two questions) *$2\times\frac{1}{2}=1$*

(i) कोऽपि कदा न प्रविशति ?

(ii) नीचा: जना: उत्कोचलोभेन स्वामिनं वञ्चयित्वा आत्मानं कुत्र पातयन्ति ?

(iii) त्वं ताम्रं किं विधातुं शक्नुया: ?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)

पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)

Answer in a complete sentence : (Only two questions) *$2\times1=2$*

(i) रात्रौ कीदृशा: जना: प्रविशन्ति ?

(ii) यदि त्वं मां प्रविशन्तं न प्रतिरुन्धे: तदा संन्यासी तस्मै (दौवारिकाय) किं दातुं कथयति ?

(iii) हस्तमाकृष्य दौवारिक: संन्यासिनं किं कथयति ?

(इ) यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्)
निर्देशानुसार उत्तर दीजिए : (केवल दो प्रश्न)
Answer as directed : (Only two questions) *2×1=2*

(i) 'कनकम्' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

(ii) 'मन्ये' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

(iii) 'यदि त्वं मां प्रविशन्तं न प्रतिरुन्धे:' अत्र 'त्वम्' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

**12.** (क) अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्त-शब्दै: पूरयित्वा पुन: लिखत।
निम्नलिखित पद्य का भावार्थ मञ्जूषा में दिए गए शब्दों से भरकर पुन: लिखिए।
Rewrite the gist of the following verse by filling it with the help of the words given in the box. *3×1=3*

दम्भो दर्पोऽभिमानश्च, क्रोध: पारुष्यमेव च।
अज्ञानं चाभिजातस्य, पार्थ संपदमासुरीम्॥

**भावार्थ:**

श्रीकृष्ण: अर्जुनं प्रति उपदिशति यत् हे (i) ___________ दम्भ:, गर्व:, (ii) _____________ क्रोध:, वचनरूक्षता च इमे (iii) ___________ येषां पार्श्वे भवन्ति ते फलाशापूर्वकं राजसी-तामसीक्रिया युक्ता: आसुरीप्रकृतिसञ्जाता: जना: भवन्ति।

**मञ्जूषा**

| अहङ्कार:, दुर्गुणा:, पार्थ ! |
|---|

**अथवा (OR)**

(ख) प्रदत्तभावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत।
दिए गए तीन भावार्थों में से शुद्ध भावार्थ चुनकर लिखिए।
Write the correct essence from three essences of the following each part.

(अ) स पिता पितरस्तासां केवलं जन्महेतव:।

(i) राज्ञ: दिलीपस्य राज्ये जना: स्वसंततिं पालयन्ति स्म।

(ii) राज्ञ: दिलीपस्य राज्ये पितर: कर्मणि प्रवृत्ता: नैव आसन्।

(iii) प्रजानां शिक्षाप्रदानात्, रक्षणात्, भरण-पोषणात् च राजा दिलीप: एव पिता, प्रजानां पितर: तु केवलं जन्महेतव: एव।

(आ) न दुर्जन: सज्जनतायुपैति।

(i) दुष्टो जन: अपि कर्मणा सज्जन: जायते।

(ii) दुर्जन: स्वप्रकृतिवशात् कदापि सज्जनानुकूलं न व्यवहरति ।

(iii) दुर्जन: सज्जनेन सह कदापि मैत्रीं न करोति।

(इ) 'युधिष्ठिरस्य एषा एव चिन्तनसरणि:।'

(i) ज्येष्ठपाण्डुपुत्रस्य द्यूतक्रीडायाम् ईदृशी एव विचारधारा आसीत् येन द्रौपदी हारिता।

(ii) तस्य ईदृशी प्रवृत्ति: नासीत्।

(iii) युधिष्ठिरस्य कुलपरम्परा ईदृशी न।

**13.** अधोलिखित-श्लोकस्य प्रदत्ते अन्वये रिक्तस्थानानि मञ्जूषाप्रदत्त-शब्दानां सहायतया पूरयत।

निम्नलिखित श्लोक के दिये हुए अन्वय में रिक्त स्थानों की पूर्ति मञ्जूषा में दिए गए शब्दों की सहायता से कीजिए।

The prose-order rendering of the following verse is given. Fill in the blanks with the help of words given in the box. *3×1=3*

स वेलावप्रवलयां परिखीकृतसागराम्।
अनन्यशासनामुर्वीं शशासैकपुरीमिव ॥

**अन्वय:**

स: (i) ____________ परिखीकृतसागराम् (ii) ____________ उर्वीम् एकपुरीम् इव (iii) ___________ ।

**मञ्जूषा**

| अनन्यशासनाम्, शशास, वेलावप्रवलयाम्। |
|---|

**14.** 'क' स्तम्भस्य वाक्यानां 'ख' स्तम्भस्य उपयुक्तवाक्यै: सह मेलनं कुरुत।
'क' स्तम्भ के वाक्यों का 'ख' स्तम्भ के उपयुक्त वाक्यों के साथ मिलान कीजिए।
Match the sentences of column 'क' with suitable sentences of column 'ख'. $4\times\frac{1}{2}=2$

| | *'क' स्तम्भ:* | | *'ख' स्तम्भ:* |
|---|---|---|---|
| i. | वेदमनूच्य आचार्य: | (क) | मम सखीविचारा:। |
| ii. | भरतो वा भवेद् राजा | (ख) | अन्तेवासिनमनुशास्ति। |
| iii. | त्यागाय संभृतार्थानाम् | (ग) | वयं वा ननु तत्समम्। |
| iv. | अपि श्रुता: भवद्भि: | (घ) | सत्याय मितभाषिणाम्। |

**15.** अधोलिखितवाक्येषु रेखाङ्कित-पदानां प्रसङ्गानुसारं शुद्धम् अर्थं मञ्जूषात: चित्वा लिखत।
निम्नलिखित वाक्यों में रेखांकित शब्दों का प्रसंगानुसार शुद्ध अर्थ मञ्जूषा से चुनकर लिखिए।
Choose and write the appropriate meanings of the underlined words in the following sentences with the help of the words given in the box. $4\times\frac{1}{2}=2$

(i) आसुरीं योनिमापन्ना <u>मूढा:</u> जन्मनि जन्मनि।
(ii) मत्कृते आवश्यकता नास्ति <u>अवलम्बनस्य</u>।
(iii) वत्सराज: राजाज्ञा पालनीयैवेति <u>मत्वा</u> तूष्णीं बभूव।
(iv) भोजने चामृतं <u>वारि</u>।

**मञ्जूषा**

| ज्ञात्वा, मूर्खा:, आश्रयस्य:, जलम्। |
|---|

**(ii) संस्कृतसाहित्यस्य सामान्यपरिचय:** *10 अङ्का:*

**संस्कृत साहित्य का सामान्य परिचय**

**General Introduction to Sanskrit Literature**

**16.** अधोलिखितप्रश्नानाम् उत्तराणि लिखत। (केवलं प्रश्नत्रयम्)
निम्नलिखित प्रश्नों के उत्तर लिखिए। (केवल तीन प्रश्न)
Answer the following questions. (Only three questions) $3\times1=3$

(i) 'मातुराज्ञा गरीयसी' अयं पाठ: कस्मात् नाटकात् संगृहीत: ?

(ii) ''भोजप्रबन्ध:'' कस्य कवे: रचनास्ति ?

(iii) रघुवंश-महाकाव्यं कस्य कवे: रचना अस्ति ?

(iv) 'कार्याकार्यव्यवस्थिति:' इति पाठ: कस्माद् ग्रन्थात् संगृहीत: ?

**17.** मञ्जूषायां प्रदत्तशब्दानां साहाय्येन रिक्तस्थानानि पूरयित्वा लिखत। (केवलं प्रश्नत्रयम्)

मञ्जूषा में दिए गए शब्दों की सहायता से रिक्त स्थानों की पूर्ति करके लिखिए। (केवल तीन प्रश्न)

Fill in the blanks with the help of the words given in the box.

(Only three questions) *3×1=3*

(i) बाणभट्टस्य प्रथमगद्यरचना ________ अस्ति।

(ii) महाकवि-माघेन विरचितम् महाकाव्यम् ________ अस्ति ।

(iii) महाकाव्यस्य विभाजनं ________ भवति ।

(iv) चम्पूकाव्यम् ________ भवति ।

**मञ्जूषा**

| सर्गेषु, गद्यपद्यमयम्, हर्षचरितम्, शिशुपालवधम्। |
|---|

**18.** समुचितं मेलयत :

समुचित मिलान कीजिए :

Match properly : *4×1=4*

| | *भाग: 'क'* | | *भाग: 'ख'* |
|---|---|---|---|
| i. | नाट्यशास्त्रम् | (क) | स्वप्नवासवदत्तम् |
| ii. | नाटकस्य प्रमुखतत्त्वम् | (ख) | कालिदास: |
| iii. | भास: | (ग) | भरतमुनि: |
| iv. | विक्रमोर्वशीयम् | (घ) | अभिनय: |